RNI No.: DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

॥ ओ३म् ॥

गुणो भूषयते रूपं
शीलं भूषयते कुलम्।
सिद्धिर्भूषयते विद्यां
भोगो भूषयते धनम्।

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

॥ ओ३म् ॥

निर्गुणस्य हतं रूपं
दु:शीलस्य हतं कुलम्।
असिद्धस्य हता विद्या
अभोगेन हतं धनम्।

( चाणक्य-नीति )

卐 वर्षम्-५ 卐 अंक:-१८ (११४) 卐 १६ मार्चमास: २०१६त: ३१ मार्चमास: २०१६ पर्यन्तम् 卐 विक्रमसंवत्-२०७२ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## यमुनाया: तीरे त्रिदिवसीय-विश्व-सांस्कृतिक-महोत्सवस्य आयोजनम्

न्वदेहली । विश्वप्रसिद्धै: आध्यात्मिकाचार्यै: श्रीश्रीरविशंकरमहाभागै: संचालितया 'आर्ट ऑफ लिविंग' इत्यनया



संस्थया देहल्यां यमुनाया: तीरे भव्यविश्वसांस्कृतिकमहोत्सवस्य आयोजनं कृतम् ।

अस्मिन् भव्यायोजने विश्वस्य 155देशानां विविध-भाषा-धर्म-संस्कृतीनां प्रतिभागिभि: भागं गृहीत्वा वसुधैव कुटुम्बकम् इत्यस्य भावस्य चरितार्थ प्रदर्शितम् । आयोजने अस्मिन् भारतस्य सर्वेषां राज्यनां नैकाषां देशानां सहस्रशै: पारम्परिककलाकारै: निजकलाया: प्रदर्शनं कृतम् । कार्यक्रमस्य आरम्भे सहस्रै: आचार्यै: संस्कृते वैदिकमन्त्राणामुच्चारणं कृतम् । कार्यक्रमस्य विविधता भव्यता महानता च शास्त्रीयनृत्येन संगीतेन च प्रकटीकृता । अस्मिन् 1700कलाकारै: कत्थक-भरतनाट्यं च प्रदर्श्य दर्शकानां हृदया: आनन्दिता: । बुल्गारिया देशात् 500 नर्तका:, अफ्रीकादेशात् 650 ढक्कावादका: थाईदेशात् 300नर्तका: पारम्परिकनृत्येन विश्वसंस्कृतिं सार्थकं कृतवन्त: । अनेनैव प्रकारेण अन्येषां देशानां जापान-रूसादीनां प्रतिभागिभिरपि भव्यप्रस्तुतय: कृता: ।

व्यस्थागतावरोधानामनन्तरमपि दिवसत्रयात्मके अस्मिन् भव्यायोजने देशस्य प्रमुखराजनैतिकतजना: अपि भागं गृहीतवन्त: । अस्योद्घाटनावसरे देशस्य प्रधानमन्त्रिण: श्रीनरेन्द्रमोदीमहाभागा:,

शेषभाग:द्वितीयपुटे

## कालिदास्य साहित्यस्य जीवन्तता विषये त्रिदिवसीया राष्ट्रिया-शोधसंगोष्ठी समायोजिता

जमशेदपुर: । झारखण्डप्रदेशस्य लौहनगर्यां जमशेदपुरस्य कर्मसाधनाभूमौ मार्चमास्य दशमे दिनांके विश्वविद्यालयानुदानायोगेन प्रायोजिते महाविद्यालये संस्कृतविभागेन त्रिदिवसीयराष्ट्रियशोध संगोष्ठ्या: समायोजनं कृतम् । वस्तुत: कालिदास्य ज्ञानसरितां महत्संगम: अत्र समायोजित: । देशस्य विविध




संस्कृतविश्वविद्यालयानां कुलपतय: पूर्वकुलपतय: तथा च समग्रभारतस्य प्राय: त्रिशताधिका: प्रतिभागिन: अस्मिन् कार्यक्रमे सम्प्राप्ता: ।

अस्य कार्यक्रमस्योद्घाटनसत्रे महामनामदनमोहनमालवीयसभागारे पद्मश्रीलब्ध प्रतिष्ठितसंस्कृतविद्वांसानां महाकवि श्रीरमाकान्तशुक्लमहोदयानाम् अध्यक्षतायां तथा च सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिनां श्रीअर्कनाथचौधरीमहाभागानां मुख्यातिथ्ये, संस्कृतस्य मूर्धन्यकवय:

शेषभाग:द्वितीयपुटे

## योगवासिष्ठमधिकृत्य सङ्गोष्ठी सम्पन्ना

-डॉ. नौनिहालगौतम:

पटियाला (पञ्जाब) 3-4 मार्च 2016 । पञ्जाबीविश्वविद्यालयस्थस्य महर्षि-वाल्मीकि-पीठस्य तथा नवदेहलीस्थाया



उद्घाटनसमारोह:

भारतीयदार्शनिकानुसन्धानपरिषद: संयुक्ततत्त्वावधानेन मार्चमासस्य 3-4 दिनाङ्कयो: ''योगवासिष्ठस्य दार्शनिकमध्ययनम्'' इति विषयमवलम्ब्य पञ्जाबी-विश्वविद्यालये राष्ट्रिया सङ्गोष्ठी सम्पन्ना जाता। उद्घाटनसमारोहे बीजभाषणं कुर्वता दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण आचार्यरमेशभारद्वाजेन प्रोक्तं यत् योगवासिष्ठं मानवसमाजाय जीवनदर्शनं प्रददाति। अयं ग्रन्थ: सरलभाषायां सहजरूपेण भारतीयचिन्तनं प्रस्तौति। योगवासिष्ठे बौद्धदर्शनमपि समाहितमस्ति। मुख्यातिथि: आचार्यरमाकान्त: अङ्गिरस: अवदत् – गीतायाम् अर्जुन: बाह्यजगता पीडित: सन् जिज्ञासां प्रकटयति, किन्तु योगवासिष्ठे श्रीराम: स्वकीये अन्त:करणे विद्यमानाभि: शङ्काभि: व्यथित: सन् जिज्ञासां प्रकटयति। उद्घाटनसमारोहस्य अध्यक्ष: पञ्जाबीविश्वविद्यालयस्य कुलपति: डॉ. जसपालसिंह: उक्तवान् यत् योगवासिष्ठस्य तथ्यानि सिक्खधर्मस्य धर्मग्रन्थेषु आगतै: तथ्यै: साम्यं रक्षन्ति। परम्पराणां संवर्धनेन साकम् इतिहास: अपि संरक्षणीय: अस्माभि:।



शोधसत्रम्

अस्माभि: सांस्कृतिकविभवस्य प्रस्तुतीकरणं सगौरवं करणीयम्। महर्षिवाल्मीकिपीठस्य अध्यक्ष: सङ्गोष्ठीसंयोजकश्च डॉ. इन्द्रमोहनसिंह: वाल्मीकिपीठस्य गतिविधि-शोधकार्य-पुस्तकप्रकाशनादिविवरणं प्रस्तुतवान्। स्वागतभाषणं डॉ. पुष्पेन्द्रजोशी, धन्यवादज्ञापनं डॉ. धनवन्तकौर:, सचालनं च डॉ. वीरेन्द्रकुमार: अकरोत् । शोधसङ्गोष्ठ्यां प्रो. वीरेन्द्रकुमार: अलंकार:, प्रो. केदारनाथ:, प्रो. भीमसिंह:, डॉ. विभा अग्रवाल:, डॉ. आशुतोष अङ्गिरस:, डॉ. चितरञ्जनदयालकौशल:, प्रो. भक्तवत्सल:, प्रो. हरमोहिन्दरसिंहबेदी, डॉ. रामचन्द्रशास्त्री, डॉ. प्रियंका आर्या, डॉ. श्यामनाथझा, डॉ. सुरेन्द्रपाल: अरोरा, डॉ. करुणा अरोरा, डॉ.

शेषभाग:द्वितीयपुटे

## ज्ञानविज्ञानस्य संस्कृति-संस्काराणां च सम्पन्नतायां भारतं विश्वगुरुरिति मन्यते – बी.एस.वशिष्ठ:

दिनेशकुमारशर्मा:

नवदेहली । वैदिककालस्य वेदाङ्गकालस्य च साहित्यस्य आधारेण ज्ञानविज्ञानस्य संस्कृतिसंस्काराणां च सम्पन्नतायां



भारतमतिरिच्य न कोऽपि देश:, अस्यैवाधारेण भारतं विश्वगुरुरिति मन्यते । अस्य च परिपेक्ष्ये संस्कृतं सर्वासां भाषाणां जननी मता । विचारोऽयं दिल्लीसंस्कृताकादम्या आयोजिते संस्कृतिप्रतियोगितापुरस्कारवितरणसमारोहस्य शुभारम्भे दिल्लीसर्वकारस्य कलासंस्कृति एवं भाषाविभागस्य उपसचिवेन श्रीबी.एस.बशिष्ठमहोदयेन प्रतिपादित: । श्रीवशिष्ठमहोदयेन कथितं

शेषभाग:द्वितीयपुटे

प्रथमपुटस्य शेषभागः

## यमुनायाः तीरे त्रिदिवसीय-विश्व....

भाजपा अध्यक्षः श्रीअमितशाहमहोदयश्च उपस्थिताः आसन् । द्वितीये दिवये वितमन्त्रिणः श्रीअरुणजेटलीमहोदयः



गृहमन्त्रीराजनाथसिंहमहोदयः तथा च समापनावसरे लोकसभा अध्यक्षा श्रीमतिसुमित्रमहाजनमहोदया, देहल्याः मुख्यमन्त्रिणः श्रीअरविन्दकेजरीवालमहोदयः आदयः महानुभावाः उपस्थिताः आसन् ।

प्रधानमन्त्रिणा स्वकीये सम्बोधने विविधदेशानां समागतप्रतिनिधीनां स्वागतं कुर्वन् कथितं यत् विश्वं न केवलमार्थिके हितानां माध्यमेन अपितु आध्यात्मिकमूल्यानामाधारेणापि एक्यं प्राप्तुं शक्यते । भारतीया इयं संस्कृति समग्रविश्वस्य कृते नवप्रेरका भवितुमर्हति ।



श्रीअरविन्दकेजरीवालमहोदयेन अस्य कार्यक्रमस्य प्रशंसा कुर्वन् कथितं यत् आर्ट आफ लिविंग सदृशसंस्थायाः नेतृत्वे एव यमुनायाः स्वच्छतायाः कार्य सम्भवम् । अस्य कार्यक्रमस्यायोजकैः श्रीश्रीरविशंकरमहोदयैः कथितं यत् कस्मिन् अपि सत्कार्ये विघ्नानि तु सामायान्ति एव परञ्च सत्येव विजयं भवतीति। तैः अस्य महोत्सवस्य कृते संस्कृत्याः ओर्लपिक इति संज्ञा प्रदता ।

प्रथमपुटस्य शेषभागः

## योगवासिष्ठमधिकृत्य सङ्गोष्ठी सम्पन्ना

आशीषकुमारः, डॉ. हेमानन्द उनियालः, डॉ. सतप्रीतकौरः, डॉ. विष्णुदत्तः, प्रो. जतिन्दरकुमारः, प्रो. सत्यदेवनिगमालङ्कारः, डॉ. वेदप्रकाशडिण्डोरिया, डॉ. रामरतनपाण्डेयः, प्रो. जितेन्द्रकुमारः, प्रो. प्रद्युम्नशाहः, श्रीविपनकुमारः, डॉ. महावीरप्रसादविद्यावाचस्पतिः, डॉ. रूबीजैनः, डॉ. ऋतुबाला, डॉ. सतप्रीतः, डॉ. लक्ष्मीशः, प्रो. लखबीरसिंहः, सन्तप्रकटनाथः, प्रो. हिम्मतसिंहः, डॉ. कुलवन्तग्रेवालः, डॉ. नौनिहालगौतमः च आसन्। डॉ. त्रिलोचनः शर्मा सङ्गोष्ठ्याः प्रतिवेदनं प्रास्तौत्। समापनसमारोहस्य अध्यक्षः प्रो. हुकुमचन्दराजपालः उक्तवान् यद् योगवासिष्ठरामायणम् कालजयिनी रचना विद्यते।

# केन्द्रीयविद्यालयेषु संस्कृताध्ययने प्रबलता

नवदेहली । संस्कृतभाषायाः अध्ययनस्य सम्बर्धनाय केन्द्रीयविद्यालयसंगठनेन विशेषाः प्रकल्पाः प्रारब्धाः । संगठनेन दशमकक्ष्यानन्तरं संस्कृतस्याध्ययनाय प्रेरणार्थं न केवलमनुबन्धाधारेण स्नातकोत्तराध्यापकानां नियुक्त्यः प्रारब्धाः, ये च छात्रान् संस्कृतस्य अध्ययनाय प्रोत्साहिताः करिष्यन्ति

केन्द्रीयविद्यालयसंगठनस्य संयुक्तायुक्त्या डॉ. विजयलक्ष्मीमहोदया अस्मिन् सन्दर्भे निर्देशः प्रदत्तः यत् पञ्चदशाधिकछात्राणामध्ययनस्य कृते सज्जानन्तरमनुबन्धाधारेण संस्कृतशिक्षकाणां नियुक्त्यः कुर्वन्विति । अत्र ध्यातव्यमस्ति यत् 2014तमे वर्षे केन्द्रीयविद्यालयेषु एकादशम्यां कक्ष्यायां भाषाविषयरूपेण संस्कृतमपि 2015-16 इत्यस्य शिक्षणव्यवस्थायां संयोजितम् । परञ्च अस्मिन् वर्षे स्वल्पैव छात्रैः अस्य चयनं कृतम् । साम्प्रतिकी स्थित्यां दृश्यते यत् नूतनानां छात्राणां नैव अपितु दशम्यामधीतसंस्कृतछात्राणामपि अस्मिन् विषये रूचिर्नैव दृश्यते । बंगलूरू तथा च एर्नाकुलमस्य छात्रैः अत्र रुचिर्प्रदशिता । संगठनेन यदा अस्य विषये सम्यकालोचनं कृतं तदा ज्ञातं यत् विद्यालयेषु संस्कृताध्यापकानां संख्यैव न्यूना वर्तते । अतश्च शिक्षकाणां पूर्त्यर्थमेव अनुबन्धाधारेण संस्कृतविषयस्य शिक्षकाणां नियुक्त्यर्थं विद्यालयाः संगठनेन निर्देशिताः यस्माच्च केन्द्रीयविद्यालयेषु दशमकक्ष्यापर्यन्तं यैः संस्कृतमधीतं ते अग्रे अपि संस्कृतस्याध्ययनं कुर्युः । अपि च प्रचारयोजनायामस्यां तेषां छात्राणां कृतेऽपि प्रोत्साहनं प्रदीयते यैः संस्कृतं दशमकक्ष्यायां नैव अधीतम् ।

प्रथमपुटस्य शेषभागः

## कालिदास्य साहित्यस्य जीवन्तता विषये...

श्रीअभिराजराजेन्द्रमिश्रमहोदयाः तथा च अन्ये




गणमान्यसंस्कृतविद्वांसः अत्र उपस्थिताः आसन् ।

महाविद्यालयस्य सभागारेजु नियोजितसत्रेषु कालिदासस्य भाज्ञा विविधता प्रासंगिकतादिविविधपक्षेषु शोधपत्राणि विविधैः शोधकैः प्रस्तुतानि । तत्रापि डॉ.अभिराजराजेन्द्रमिश्रमहोदयानां, आचार्यअर्कनाथचौधरीमहोदयानां च शोधपत्राणि विशेषरूपेण उल्लेखनीयानि आसन् ।

कार्यक्रमस्यास्य द्वितीये दिवसे अपि शोधपत्रवाचनं तथा च सायंकाले सर्वभाषाकविसम्मेलनं समायोजितम् यत्र उडिया,बंगला, मैथिली,मगही,भोजपुरी,हिन्दी आदिषु भाषासु कविभिः काव्यपाठं कृतम् । तृतीये च दिवसे श्रीजगन्नाथपुरीसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो.गंगाधरपण्डामहोदयानाम् अध्यक्षतायां नियोजितसत्राणां शुभारम्भोऽभवत् । तथा चान्ते समापनसत्रे कालिदासस्य साहित्यस्य कालजयित्वं स्वीकृत्य कार्यक्रमोऽयं सम्पन्नतामगात् ।

प्रथमपुटस्य शेषभागः

## ज्ञानविज्ञानस्य संस्कृति-संस्काराणां च.....

यत् दिल्लीसर्वकारेण देहल्यां संस्कृतभाषायाः सर्वतोमुखीविकासाय संस्कृताकादम्याः स्थापना कृता यस्यां संस्कृतभाषाया एवं साहित्यस्य विकासाय विविधाः कार्यक्रमाः, उत्कृष्टसाहित्यस्य संकलनं, साहित्यकाराणां कृते च प्रोत्साहनं प्रदीयते । अकादम्या क्रियमाणाः कार्यक्रमाः अस्योद्देश्यप्राप्त्यां नितरामग्रसराः ।

अस्मिन्नवसरे अकादम्याः सचिवेन डॉ.जीतरामभट्टमहोदयेन कथितं यत् शिक्षकः राष्ट्रनिर्माता भवति । छात्राणां कृते संस्काराणि ददाति । दिल्लीसंस्कृताकादम्या नैकाः प्रतियोगिताः आयोजिताः यत्र संस्कृतशिक्षकाणां कृते विविधाः प्रतियोगिताः आयोजिताः । प्रतियोगिता विजेतारः पुरस्कृताः । अस्मिन् अवसरे श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य दर्शनविभागस्य अध्यक्षैः प्रो. महेशप्रसादसिलोडीमहोदयेन कथितं यत् समाजस्य निर्माणे शिक्षकानां महनीयं योगदानं वर्तते । संस्कृतसाहित्यं विश्वस्य समृद्धतमं साहित्यं वर्तते । अस्मिन् साहित्ये सर्वेज्ञां विषयाणां ज्ञानं निहितमस्ति ।



अवसरेऽस्मिन् नैके गणमान्यजनाः संस्कृतानुरागिणश्च महानुभावाः उपस्थिताः आसन् ।

# भारतीयगौप्रतिष्ठारथयात्रायाः आह्वानेन राष्ट्रमातागौआन्दोलनस्य द्वितीयं चरणमारब्धम्

नवदेहली । फरवरीमासस्य अष्टाविंशतितमे दिनांके देहल्यां रामलीलीपरिक्षत्रे समायोजिते गौरक्षा–आन्दोलनान्तरं जन्तरमन्तरस्थले



अष्टादशदिवसात्मके धरनाप्रदर्शनं द्वितीयचरणस्य आह्वानेन सम्मपनतामगात् ।

स्मापनसत्रे भारतीयगौक्रान्तितञ्चेन समग्रदेशे सहस्रहशः गौभक्तैः गौक्रान्तिअग्रदूतानां पू.गोपालमणिमहाराजानां नेतृत्वे जन्तरमन्तरस्थलात् संसदभवनं यावत् शान्तिपूर्वकं पदयात्रा कृता । तत्र च सुरक्षाकर्मिभिः अवरोधानन्तरं धरनाप्रदर्शनं कृतम् ।




संसदभवनस्य निमन्त्रणानन्तरं राष्ट्रपति–प्रधानमन्त्री–गृहमन्त्रीमहोदयानां च कृते ज्ञापनं प्रदत्तम् । अपि च गोमातुः राष्ट्रमातारूपेण सम्मानाय ''भारतीयगौप्रतिशरथयात्रायाः' समग्रदेशीयकार्यक्रमस्य उद्घोज्ञणा कष्टता ।

# संस्कृतस्याध्ययेन विना भारतीयसंस्कृतेरध्ययनमपूर्णमेव–संजीवझा

नवदेहली । विश्वस्य सर्वासु प्राचीनभाषासु संस्कृतस्य अतीवमहत्वपूर्णं स्थानं वर्तते । विश्वस्य साहित्ये सर्वेभ्यः



प्राचीनतमाः ग्रन्थाः वेदाः संस्कृते एव। संस्कृतस्य अध्ययनं विना भारतीयसंस्कृतेः पूर्णज्ञानं नैव सम्भावितम् । विचारोऽयं



प्राच्यविद्याप्रतिष्ठानेन श्रीनिवाससंस्कृतविद्यापीठे समायोजिते संस्कृतगुरुकुलीयसम्मेलने मुख्यतिथिमहोदयेन दिल्लीविधानसभासदस्येन श्रीसंजीवझामहोदयः प्रतिपादितः । श्रीझामहोदयेन कथितं यत् एतादृशैः सम्मेलनैः भाज़ायाः चिन्तनस्य कृते दिशा प्रदीयते । विश्वस्य सर्वे विद्वांसः संस्कृतभाषायाः क्षमतां जानन्ति एव । संस्कृतभाषया साहित्येन च भारतस्य व्यापकता विश्वे प्रसारिता । संस्कृतभाषया एव अस्माकं देशः एकस्मिन् सूत्रे ग्रन्थितः ।

अस्मिन्नवसरे प्राच्यविद्याप्रतिशनस्य निदेशकैः, दिल्लीसंस्कृताकादम्याश्च सचिवैः डॉ.जीतरामभट्टमहोदयैः कथितं यत् संस्कृतगुरुकुलैरेव भारतं विश्वगुरुरिति उपाधि प्रदत्ता । सम्प्रति देहल्यां त्रिंशताधिकसंख्यायां गुरुकुलाः सन्ति ये



संस्कृतशिक्षणस्य कार्यं कुर्वन्तः सन्ति । अस्य सम्मेलनस्य माध्यमेन देहल्याः सर्वे संस्कृतविद्यालयाः सर्वेकारेण अपेक्षां कुर्वन्ति यत् देहल्यां काचित् संस्था स्यात् यच्च संस्कृतस्य विद्यालयानां कृते मान्यतायाः परीक्षादीनां वा व्यवस्था कुर्यादिति ।

अस्मिन् अवसरे दिल्लीसंस्कृताकदम्याः उपाध्यक्षः प्रो. गणेशदत्तशर्ममहोदयेन कथितं यत् विश्वस्य नैकेषु देशेषु संस्कृतभाषायाः वैज्ञानिकस्वरूपं परिज्ञातुमध्ययनं गम्भीरं च शाधकार्यं क्रियते । अस्मिन्नवसरे श्रीनिवाससंस्कृतविद्यापीठस्य प्राचार्यश्रीगोविन्दाचार्यमहोदयेन कथितं यत् संस्कृतविद्यालयानां समक्षमिदानीं मान्यतायाः परीक्षायाश्च महती समस्या वर्तते । दिल्लीसर्वकार एव अस्याः समास्यायाः समाधानं कर्तुं शक्नोतीति ।

Girish Kumar Bansal,Manager
Vidya Deep Public School
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत–संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई–मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन–चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

दिल्ली सरकार

दिल्ली संस्कृत अकादमी, दिल्ली सरकार
प्लॉट सं.–5, झण्डेवालान, करोलबाग, नई दिल्ली–110005
दूरभाष नं. :– 23635592, 23681835, 23555676

**त्रिदिवसीय अखिल भारतीय संस्कृत सम्मेलन**
(वर्ष 2015–2016)
**आवश्यक सूचना**

दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा मार्च माह में दिनांक 28.3.2016 से 30.3.2016 तक एक **त्रिदिवसीय अखिल भारतीय संस्कृत सम्मेलन** का आयोजन मौलाना आजाद रोड़, स्थित विज्ञान भवन में किया जा रहा है। सम्मेलन में वैदिकवाङ्मयम्, ज्योतिषशास्त्रम्, व्याकरणम्, उपनिषद्, दर्शनम्, रामायणं, महाभारतं पुराणानि च, नीतिशास्त्रं अर्थशास्त्रञ्च, स्मृतिशास्त्रं, धर्मशास्त्रञ्च, आयुर्वेदः योगश्च, आधुनिक–संस्कृत–साहित्यम्, अन्ये विषयाः (निर्धारिताः)–आदि विषयों पर शोधलेखों के वाचन हेतु चयनित सभी विद्वानों को निमन्त्रण पत्र प्रेषित कर दिये गये हैं। सम्मेलन की विस्तृत जानकारी आकादमी की वेब साईट–www.sanskritacademy.delhi.gov.in पर संलग्न है।

Web Site:- www.sanskritacademy.delhi.gov.in
Email: - dsa.sammelan@gmail.com
Facebook: - www.facebook.com/delhisanskritacademy

ह०/–
डॉ० जीतराम भट्ट
सचिव

# सम्पादकीयम्

## क्रीताः शान्तिः सद्भावः, अध्यात्मः योगश्च

देशे अराजकतायाः वातावरणं विश्वविद्यालयेषु देशद्रोहस्य वार्ताः निश्चितरूपेण राष्ट्रवादीनां कृते चिन्तायाः विषयोऽस्ति । एतादृशे निराशायाः समये राजधान्यां देहल्यां यमुनायाः तीरे 'आर्ट् ऑफ लिविंग'इति संस्थया विश्वसांस्कृतिकमहोत्सवस्यायोजनं सुखदानुभावको वर्तते । अस्मिन् महोत्सवे सम्मिलितैः देशविदेशानां नागरिकैः सद्भावस्य शान्तेः मानवतायाश्च संदेशः प्राप्तः । विभिन्नसंस्कृतीनामस्मिन् महाकुम्भे सम्भूय अस्माकं राजनैतिकनेतृत्वेनापि अस्य आयोजनस्य मुक्तकण्ठेन प्रशंसा कृता । कोटिशः रूप्यकाणामस्य भव्यायोजनस्य सज्जा गतवर्षादेव क्रियते स्म । परञ्च अन्तिमे समये पर्यावरणस्य नाम्ना व्यवस्थागतव्यवधानेन विश्वशान्तेः संदेशप्रदायकाः महानयोगीश्रीश्रीरविशंकरः उद्वेलिताः । आकस्मिकरूपेण प्रावृषेणापि तेषां परीक्षा कृता । भारमभूमौ अस्य विशालभव्यतासम्पन्नेन आयोजनेन यत्र समग्रविश्वे कीर्तिमानं स्थापितं तत्रैव जनसामान्यानां कृते शान्तेः सद्भावस्य च सन्देशः प्रदर्शितः । अनेन राजश्रीकार्यक्रमेण धनिकवर्गः भौतिकसुखसम्पन्नतानान्तरम् आध्यात्मिकसम्पन्नतायाः कृते प्रेरितः । निश्चितरूपेण च देशस्य जनसामान्यानां कृते शान्तेः अध्यात्मस्य उपदेशः प्रदत्तः । परञ्च अतीवभव्योऽयं कार्यक्रमो तस्य कृते सम्भवत एव सार्थको दृश्यते यस्य कृते मूलभूतानामावश्यकतानां पूर्तिरिव प्राथमिकी ।







# वास्तुशास्त्रानुसारं भूमेः अष्टदिक्प्लवत्वफलम्

**रतीश कुमार झा**
**शोधच्छात्रः**
**श्रीलालबहादुरशास्त्रीराष्ट्रिय संस्कृतविद्यापीठम्, नवदेहली-16**

मानवानां निवासयोग्यानि भवनानि भूमय एव वास्तुशास्त्रमिति कथयन्ति बुधाः। एवं हि यस्मिञ्छास्त्रे भूमीषु च भवनेषु आवासकर्तृभ्यो बह्वीस्सुरक्षाश्च सुविधाः प्राप्तये नियमानां, सिद्धान्तानां च प्रविधीनां प्रतिपादनं क्रियते, तच्छास्त्रं वास्तुशास्त्रम्। 'वास्तुः' शब्दोऽयं 'वस् निवासे' धातोः तुन् प्रत्यययोगे सति निष्पन्नो भवतीति। भारतीयसंस्कृतिसभ्यतयोर्मूलाऽधाराः सन्ति वेदाः, एतेषां वेदानां चत्वार उपवेदा अपि सन्ति, ऋग्वेदस्याऽऽयुर्वेदो यजुर्वेदस्य धनुर्वेदस्सामवेदस्य गान्धर्ववेदस्तथाऽथर्ववेदस्य स्थापत्यवेदः। स्थापत्यवेदस्याऽभिप्रायोऽपि निवासयोग्या भूमिश्च भवनान्येव।

ऋग्वेदस्य सप्तमे मण्डले वास्तोष्पतिभ्यः प्रार्थना कृता यत्ते रक्षेयुः। यथा -

**ओउम् वास्तोष्पते प्रज्जिानीह्य**
**स्मान्तस्वावेभोऽअनमीवो भवानः।**
**यत्वे महे प्रति तन्नो जुषस्व**
**शन्नो भव द्विपदे शं चतुष्पदे॥**[1]

वैदिकसाहित्यस्य शुल्बसूत्रे प्रतिपादितेषु वेदेनिर्माणेसु शिलायाः प्रयोगाः प्रचिलिताः बभूवुः। ये प्रमाणीक्रियन्ते स्थापत्यवेदो वेदानां विकसितं सुदृढं रूपं वास्तुशास्त्रमिदम्। भवनिर्माणार्थं सर्वप्रथमन्तावद्भूमिञ्चनुयात्। आचार्येण वराहमिहिरेण बृहत्संहितायामुत्तमा भूमिस्थितिरियमुक्ता - यत्र भूमौ औषधि वृक्षा लता मृच्च स्निग्धा, समा तथा श्रान्तानां विश्रान्तिस्सम्भवेत् तत्रैव शाशूवतानां मन्दिराणां कृते (गृहाणां) स्थानन्ददेत। यथा -

**शस्तौषधिद्रुमलता मधुरा सुगन्धा**
**स्निग्धा समा न सुषिरः नराणाम्।**
**अप्यध्वनि श्रमविनोदमुपागतानां**
**धत्ते श्रियं किमुत शाश्वतमन्दिरेषु॥**[2]

भूम्या मृद्वर्णाऽधारे शास्त्रेकारैर्भूमिश्चतुर्धा परिकीर्तिता क्रमादेव ब्राह्मणी क्षत्रिय वैश्या शूद्रा च। शुक्लवर्णा या भूमिः सा ब्राह्मणी कथ्यते। रक्तमृत्स्ना या भूमिरस्ति सा क्षत्रिया वर्तते। हरिद्वर्णा या भूमिः सा वैश्या इति तथा च कृष्ण या सा शूद्रा यथा -

**शुभस्य शुभदा ज्ञेया दशा पापस्य चाधमा।**
**शुक्ला मृत्स्ना च या भूमिर्ब्राह्मणी सा प्रकीर्तिता॥**
**क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या उदाहृता।**
**कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा परिकीर्तिता॥**[3]

प्रकारान्तरे तु कुशोपेता ब्राह्मणी भवति, शरयुक्ता क्षत्रिया, कुशकाशयुक्ता वैश्या एवं च तृणाकुला शूद्रा भूमिरियं प्रसिद्धा। यथा -

**ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छाराकुला।**
**कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला॥**

कल्पद्रुमोक्ताया भूम्या लक्षणमिदमस्ति, सुगन्धा भूमिर्ब्राह्मणी भवति, रक्तगन्धा भूमिर्भवति क्षत्रिया, मधुगन्धा भूमिरस्ति वैश्या एवं हि मद्यगन्धा भूमिर्वर्तते शूद्रा इति बुध्यात्।

अम्ला भूमिर्भवति वैश्या, तिक्ता भूमिरस्ति शूद्रा, मधुराभूमिर्भवति ब्राह्मणी च कषाया भवति क्षत्रिया इति प्रतिपादिताः सन्ति। यथा -

**सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रिया।**
**मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका॥**
**अम्ला भूमिर्भवेद्वैश्या तिक्ता शूद्रा प्रकीर्तिता।**
**मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिय मता॥**[4]

वास्तुशास्त्राऽनुसारेण भूंखडभूमिप्लवना अष्टधा वीथिः प्रकल्पिता, तेषां शुभाशुभविचारोऽस्त्यत्र। यथा -

| वीथयः | दिशा | | फलम् |
|---|---|---|---|
| 1.गोवीथिः | पश्चिमः | पूर्वः | शुभम् |
| 2.जलवीथिः | पूर्वः | पश्चिमः | अशुभम् |
| 3.यमवीथिः | उत्तरः | दक्षिणः | अशुभम् |
| 4. गजवीथिः | दक्षिणः | उत्तरः | शुभम् |
| 5. भूतवीथिः | ईशानः | नैर्ऋत्यः | अशुभम् |
| 6. नागवीथिः | अग्निः | वायव्यः | अशुभम् |
| 7. वैश्वानारीवीथिः | वायव्यः | अग्निः | शुभम् |
| 8. धनवीथिः | नैर्ऋत्यः | ईशानः | शुभम् |

अन्यच्चाऽग्निकोण्स्य मध्ये उच्चतमा भूमि पश्चिमे तथा वायुकोणे नीचतमा पितामहो वास्तुः कथ्यते। या निवासायासुखदा भूमिर्भवति तस्या वास्तुविद्याग्रन्थे वीथीनां फलं प्रचोदितम्। यथा

**पूर्वप्लवा वृद्धिकरी उत्तरा धनदा स्मृता।**
**अर्थक्षयकरीं विद्यात् पश्चिमाप्लवना ततः॥**
**दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत्।**
**वारुणोच्चसमायुक्ता नीचमाहेन्द्रसंयुता॥**
**सा गोवीथिरिति ज्ञेया ऐन्द्रोच्चा नीचवारुणा।**
**जलवीथिरिति प्रोक्ता वास्तुज्ञानविशारदैः॥**
**सोमोच्चयमनीचा च यमवीथीनि कथ्यते।**
**यमाच्चसामेनीचा च गजवीथीति कथ्यते॥**
**ईशोच्चं निर्ऋतौ नीचं भूतलं भूतवीथिकम्**
**आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते।**
**वायूच्चमग्निनीचं यद् वैश्वानरी विदुः।**
**निर्ऋत्युच्चमीशनीचं धनवीथीत्युदाहृता॥**
**इन्द्राग्न्यन्तरमुच्च स्यान्नीचं वरुणवातयोः।**
**वास्तु पैतामहं विद्यान्नराणां कुरुते शुभम्॥**[5]

मतभिन्ने तु पूर्वस्यां प्लवा भूमिर्धनदा भवति। अग्निकोणे दाहदा, दक्षिणे मृत्युदा, नैर्ऋत्ये धनहारिणी, पश्चिमायां दिशि पुत्रक्षयिनी, वायव्ये परदेशगा, उत्तरे धनदा, ईशाने विद्याप्रदात्री, मध्ये नीचतमा भूमिः कष्टदायिका भवति एव।

**श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।**
**प्रवासं धनलाभं च विद्यालाभं क्रमेण च॥**
**विदध्यादिचिरणैव पूर्वादिप्लवतो मही।**
**मध्यप्लवा मही नेष्टा न शुभा प्लवतत्परा॥**[6]

अनेन क्रमेण स्पष्टीक्रियत इदम्। यथा-

दिक्प्लवाः-पूर्वे-आग्नेयां-दक्षिणे-नैर्ऋत्ये-पश्चिमे-वायव्ये-उत्तरे-ईशाने
फलम्-श्रीलाभः-दाहः-मृत्युः-धननाशः-पुत्रहानिः-प्रवासः-धनागमः विद्यालाभः

केचित्तु भूमिप्लवसम्बन्धे वदन्ति, ईशानकोणे भूमिः प्लवा भवति चेद् गृहपतीनां कृते धनदा भवति। पूर्वस्यां सुखदा भूमिः कल्प्यते। उत्तरस्यां धनलाभस्य परिकल्पना प्रकल्पिताऽस्ति, अग्निकोणे मृत्युशंकायाश्च शोकस्याऽशंका प्रतिभाति। दक्षिणास्यां दशि गृहनाशस्य भावं ददते भूमिरियम्। नैर्ऋत्ये धनहानेभार्वोऽस्ति। पश्चिमायां अपयशस्कारिका भवति इति वायव्ये तु मानसिकोद्वेगकारिका भूमिर्भवति। यथा -

**शुम्भकोणे प्लवा भूमिः कर्तुः श्रीसुखदायिनी।**
**पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा॥**
**मृत्युशोकप्रदा नित्यमाग्नेयी दक्षिणप्लवा।**
**गृहक्षयकरी सा च भूमिर्यानिर्ऋतिप्लवा॥**
**धनहानिकारी चैव कीर्तिदा वरुणप्लवा**
**वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी॥**[7]

आचार्यो नारायणभट्टोऽगीर्यदिति ब्राह्मणेभ्यो भवत्युत्तरप्लवा भूमिश्शुभा। क्षत्रियेभ्यः पूर्वप्लवा भूमिरुत्तमा अस्ति। वैश्यानां कृते दक्षिणप्लवा भूमिरुचिता तथा च शूद्रेभ्योऽस्ति शुभा भूमिः पश्चिमप्लवा एवं हि ब्राह्मणेभ्यस्तु सर्वप्लवा भूमिश्शुभा भवत्येव। यथा -

**सौम्यादिप्लवभूतले विरचयेद्विप्रादिकोऽग्रयोऽखिले।**
**नान्येषां नियमोऽथ यत्र निखिला कुर्युर्गृहं हृत्स्थिरम्॥**[8]

औपसंहारिकतया बुभूषेदिदञ्च यस्मिन्भूखण्डे गृहीनिर्माणमिच्छेत् तत्र नैर्ऋत्यं कोणमुच्चतमञ्च ईशानं कोणं नीचतमञ्चिकीर्षेत्। वायव्यकोणामिशानाद् उच्चतं तथा आग्नेयं वायव्याद् उच्चतमम् इच्छेत्। एतादृक्षु भूखण्डेषु निवासे जीवने प्रगतीनां समृद्धीनां च समावेशो भवति। भूखण्डाऽकृतिवातावरणसमीपवर्तिमार्गगुणवत्तादीनां निर्धारणं शल्यपरीक्षणेन कुर्यादिति।

अतः स्वानुभव इति बूभूषामि यन्मानवानां सुखसमृध्द्य आदिभ्यो वास्तुशास्त्रमिदं सहायकं लाभदायकं प्रयतते।

**(Footnotes)**

1 ऋग्वे. 07.54.01
2 बृहत्संहिता वास्तुविद्याध्यायः श्लोकसंख्या - 88
3 बृहद्वास्तुमालायाम्,भूमेर्लक्षणानि श्लोकसंख्या - 27, 28
4 बृहद्वास्तुमालायाम्,भूमेर्लक्षणानि श्लोकसंख्या - 29
5 बृहद्वास्तुमालायाम्, भूमेर्लक्षणानि श्लोकसंख्या - 41-47
6 बृहद्वास्तुमालायाम्, भूमेर्लक्षणानि श्लोकसंख्या - 35
7 बृहद्वास्तुमालायाम्, भूमेर्लक्षणानि श्लोकसंख्या - 37-39
8 बृहद्वास्तुमालायाम्, भूमेर्लक्षणानि श्लोकसंख्या - 40

# संस्कृत-व्याकरणे जीवनदर्शनम्

-डॉ. शिवकुमार शर्मा
संस्कृत-प्रवक्ता
श्रीतुलसी ई.का.राजापुरम, चित्रकूटम्

अत्र किन्नाम संस्कृतं किं च तस्य व्याकरणम् इति सम्यगालोच्य जीवनदर्शनं चिन्तनीयमस्ति।। ''संस्कृत–व्याकरणे जीवनदर्शनम्'' इति विषयमवलम्ब्य चिन्तनसरिणं प्रसारयामि। तत्र पूर्वं किन्नाम संस्कृतमिति प्रस्तौमि–

ब्रह्मणः सृष्टौ उत ब्रह्मणो विवर्तभूतेऽस्मिन् जगति प्राणिनो येन माध्यमेन परस्परं विचाराणामादानप्रदानं सरलं स्पष्टं च कुर्वन्ति तन्माध्यम एवं ''भाषा'' इति पदमारोढुं समर्थो भवति। भूण्डलेऽस्मिन् बह्व्यः भाषा सन्ति। तासु च भाषासु या भाषा ऋषिभिः ध्याने गृहीता, देवैः संस्थापिता, निःशेषसंस्कारैश्च संस्कारिता, यस्यां च भाषायां परब्रह्मणा ब्रह्मणः हृदि वेदाः प्रकाशिताः महर्षिभिः यस्यां भाषायां मन्त्राः ध्याने गृहीताः, उपनिषद्ग्रन्थाः, आरण्यकग्रन्थाः, ब्राह्मणग्रन्थाः, पुराणानि महाभारतं च यस्यां भाषायां विरचितानि सन्ति। अपि चाधुनिके युगे वैज्ञानिकैः संगणकाय या भाषा व्याकरणदृष्ट्या सर्वोत्तमा भाषा ख्यापिता, सैव संस्कृतभाषा देववाणीति पदे संराजमाना संराजते। अस्यामेव भाषायां लिखितं सत्तदेव संस्कृतवाङ्मयमित्युच्यते।

किन्नाम व्याकरणम्–

संस्कृतवाङ्मये पाणिनेः व्याकरणमेवेदानीं व्याकरणत्वेन ख्यापितमस्ति।

''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्'' यो विधिः शब्दान् व्युत्पादयति, स विधिरेव व्याकरणत्वेन स्वीकृतो भवति। अथवा शब्दानां यत् व्युत्पत्तित्वं तदेव व्याकरणम्, अथवा यस्मिन् ग्रन्थे शब्दानां व्युत्पत्तयः प्रकृति–प्रत्ययविभागत्वेन प्रदर्शिताः सन्ति, तदपि मन्ये व्याकरणमेव।

अहन्तु मन्ये यज्जीवनस्यापि प्रक्रिया विविधजीवनदर्शनत्वेन यत्र वर्णिता अस्ति, न केवलं शब्दानां तदेव व्याकरणम्। तत्र च जीवनदर्शनं कथमिति अवलोकयन्तु भवन्तः–

प्राणिनां जन्मत आरभ्य आमरणं जीवनं प्रचलति। यावत् तस्यैहलौकिकी सत्ता अस्ति, तावत् सः जीवितः अस्ति जीवनेन संवालितश्चास्ति। एतादृशं जीवनं प्रथमं द्विविधं भवति व्यावहारिकम् पारमार्थिकं च। आद्यं चतुर्धा-वैयक्तिकम्, पारिवारिकम्, सामाजिकम्, राजनैतिकं चेति। पुनश्च नैतिकानैतिकभेदेनाष्टधा, आहत्य नवधा। उत्तरोत्तरमुनीनां प्रामाण्यं यत्रास्ति तत् त्रिमुनिव्याकरणं पाणिनीयमेव व्याकरणम्। तत्र सूत्रकारो महर्षिपाणिनिः वार्तिककारः कात्यायनः, भगवान् पतञ्जलिश्च महाभाष्यकारः। एषां त्रयाणां क्रमशश्चिन्तनेन निर्दुष्टत्वं व्यापकीभूय तिष्ठति, तथा तिष्ठति यथा सूक्तिरेव विश्रुता लोके–''यदर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः''। अर्थादस्मिन् व्याकरणे निष्फलत्वेनार्धमात्राया अपि प्राप्तिः न भवति, तर्हि तस्मिन् व्याकरणे यज्जीवनदर्शनं चिन्तनीयमस्ति तत् सर्वविधत्वं कथं न धारयिष्यति।

अतः अत्र सर्वविधजीवनस्य स्वरूपमुपस्थपाप्यते। अत्र प्रथमत्वेन नवधात्वं कथमिति स्फुटं यथा–




अत्र नैतिकत्वं नाम ''बहुजनहिताय, बहुजनसुखायैव'' अतो विपरीतमनैतिकम्। अत्रेदमपि चिन्त्यं यत् त्रिमुनिव्याकरणस्य त्रिविधं मूलतत्त्वम्, सूत्रम, वार्तिकम्, भाष्यञ्चेति। किन्नाम सूत्रम?

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**
**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥**

तानि च कतिविधानि?

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशाऽधिकारश्च षड्विधं सूत्रलक्षणम॥**

''नाकरणं संज्ञा'', यथा– ''मुखनासिकावचनोऽनुनासिकाः'' ''उच्चैरुदात्तः''। ''अनियमे नियमकारिणी परिभाषा'', यथा– ''तस्मिन्निति निर्दिष्टे पूर्वस्य'', ''तस्मादित्युत्तरस्य''। कर्तव्यत्वेनोपदेशो विधिः,'' यथा–''इको यणचि'', ''आद् गुणः''। ''बहुत्र प्राप्तौ संकोचनं नियमः'' अथवा ''प्राप्तविधेर्नियाकमकं सूत्रं नियमसूत्रम्,'' यथा– ''रात्सस्य''। ''अन्यतुल्यत्वविध नमतिदेशः'' यथा–''स्थानिवदादेशोऽनल्विधौ'', ''लोटो लङ्वत्''। ''उत्तरप्रकरणव्यापी अधिकारः'' अथवा ''स्वदेशे वाक्यार्थशून्यत्वे सति परदेशे वाक्यर्थबोधकत्वम् अधिकारः'' यथा– ''प्रत्ययः'', ''परश्च'', ''ङ्याप्प्रातिपदिकात्''। वार्तिकलक्षणम् यथा–

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्तिकं पाहुर्वार्तिकज्ञा विचक्षणाः॥**

तद्यथा- ''ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्'', ''यणः प्रतिषेधो वाच्यः''। भाष्यलक्षणं यथा–

**सूत्रार्थे वर्ण्यते यत्र वर्णैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥**

तद् व्याकरणमहाभाष्यं स्पष्टमेव।

इत्थं सूत्राणां षड्विधत्वमुपलक्षणं विविधानां शरीराणाम्। यानि शरीराणि मातृभिः प्राप्तानि भवन्ति, तानि विविधानि भवन्ति परं सर्वत्रोक्तानुक्तदुरुक्तचिन्तनात्मकानि वार्तिकानीव पितृणामुपदेशो भवति एकत्वात्मक एव। अपि चेत्थमेव मातृरुपदेशस्य प्रभावं स्वरूपं च चिन्तयति तथा च पितुरुपदेशस्य प्रभावं स्वरूपं च चिन्तयति गुरुः, ततः दूषणं निवारयति, गुणान् वर्धयति स्वयमप्युपदेशं दत्वा तस्य प्रभावमवलोकयति नियमयति च शिष्यम्। एवं भवति व्याकरणे जीवनदर्शनस्य दर्शनम्।

अत्र सर्वविधजीवनस्य स्वरूपं चिन्तनीयमस्ति। तस्य प्रथमो भेदः वैयक्तिकजीवनम्। तस्य समाजे दृष्टं स्वरूपं व्याकरणशास्त्रे च तस्य दर्शनमत्र विस्तरेणोपस्थाप्यते। अत्रेदमवधेयं यदहमित्थमेवं समेषामपि भेदानां प्रथमं समाजे दृष्टस्वरूपं विचार्य तदनन्तरं व्याकरणशास्त्रे तस्य दर्शनं कथं भवति इति समुपस्थापयिष्यामि–

**''वैयक्तिकजीवनम्''–**

''मन्ये वैयक्तिकजीवनं नाम भौतिकजीवनम्''। ''यत्पाञ्चभौतिकं शरीरमेवाधिकृत्य जीवितं भवति अर्थात् शरीरस्यैव पोषणत्वमलंकरणत्वं च यद् भवति तदेव नाम वैयक्तिजीवनम्''। अपि च ''ब्रह्मचर्याश्रमोऽपि वैयक्तिकं भौतिकं वा जीवनमिव भवति''। इत्थं स्पष्टं भवति भौतिकशरीरं यावदेव व्यापकं जीवनं वैयक्तिकजीवनं वक्तुं शक्यते।

अस्य जीवनस्य व्याकरणशास्त्रे कथं दर्शनं भवति इति अवलोकयन्तु भवन्तः–मन्ये संज्ञासूत्राणि वैयक्तिजीवनत्वमेव स्पस्टं कुर्वन्ति। तद्यथा- ''अदेङ् गुणः' इति संज्ञासूत्रमस्ति, ''अत् एङ् च गुर्णसंज्ञः स्यात्''। इत्थमिदं सूत्रं स्वस्मिन्नेव पूर्णत्वं स्वीकृत्य तिष्ठति, एतादुशानां सूत्राणां मूलाथोऽन्येषामाकाङ्क्षां विनैव पूर्णो भवति।

अपि च परिभाषेन्दुशेखरदिशा ''यथोद्देशं संज्ञापरिभाषम्'' कार्यकालं संज्ञापरिभाषम्''– इति च यत्कथनमस्ति तत्तथैव भवति, यथा कोऽपि वैयक्तिकजीवनस्याधिष्ठातारं प्रति गच्छति स्वकार्यवशात्, आहोस्वित् परोपकारधिया स्वयमपि गच्छति कदाचित् वैयक्तिजीवनस्याधिष्ठाता। तदेव संज्ञासूत्राणां विषये भवति, परिभाषासूत्राणामपि विषये तथैव।

**''पारिवारिकजीवनम्''–**

''पाणिग्रहणसंस्कारेण संस्कारितयोः स्त्रीपुरुषयोः औरसपुत्र-पौत्रादीनां मध्ये यज्जजीवनं तत्पारिवारिकं जीवनम्'' अर्थात् ''परितो व्रियते अनेनेति परिवारः, तस्य जीवनम् पारिवारिकजीवनम्''। अर्थात् ''पितामह-पितृ-पुत्र-पौत्रादीनां परस्परं यथोचितम् आनुकूल्येन विहरणं निवसनं च यत्र भवति, तद् भवति पारिवारिकजीवनम्''।

व्याकरणे च कथमेतादृशं जीवनमिति पश्यन्तु भवन्तः, चतुर्दशमाहेश्वर-सूत्राणां ग्रहणम् ''अल्'' प्रत्याहारत्वेन भवति। मध्ये 'अच्' इति-द्वौ प्रत्याहारौ भवतः। तदनन्तरं ''अच्-सन्धिः। हल्-सन्धिः भवति हलां सन्धिः। एतौ अज्झलपरिवारावेव। तदनन्तरं भवन्ति अचां प्रकरणानि पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गानि, इत्थमेव हलां प्रकरणानि। एवमेव तिङन्तानां परिवारः, कृदन्तानां परिवारः, तद्धितानां परिवारः, स्त्रीप्रत्ययानां च परिवारः।

अपि च परिवारे एक एव पुरुषः बहुविधो भवति। तत्कथम्-एक एव पुरुषः, पुत्रः, पिता, पितामहः श्वशुरः, श्यालः, मातुलः, पितृव्यः, जामाता इत्यादयः विविधाः संज्ञाः धारयति।

इत्थमेव व्याकरणे एक एव अण् बहुविधो भवति। अकारो यथा–ह्रस्वस्य षड् भेदाः।

ह्रस्व उदात्त अनुनासिकम् = अँ उदात्तस्य चिह्नं वेदेषु न भवति

ह्रस्व उदात्त अननुनासिकम् = अ उदात्तस्य चिह्नं वेदेषु न भवति

ह्रस्व अनुदात्त अनुनासिकम् = अँ अनुदात्तस्य चिह्नं वर्णस्याध :रेखा भवति।

ह्रस्व अनुदात्त अननुनासिकम् = अ अनुदात्तस्य चिह्नं वर्णस्याधः रेखा. भवति।

ह्रस्व स्वरित अनुनासिकम् = अँ स्वरितस्य च उपरि रेखा भवति।

ह्रस्व स्वरित अननुनासिकम् = अं स्वरितस्य च उपरि रेखा भवति।

एवमेव दीर्घस्य प्लुतस्य च षड् भेदाः भवन्ति, समे चाष्टादश भेदाः भवन्ति।

मन्ये परिवारे केचिज्जनाः विविधाः संज्ञाः न धारयन्ति। चेत् पुत्रः अपत्यं वा नास्ति,

तर्हि सः पितृत्वं न धारमिष्यति। तद्वदेव एचामपि द्वादश तेषां ह्रस्वाभावात्। यवला द्विधा भवन्ति अनुनासिक-अननुनासिक-भेदेन। तत्रैव हकाररेफयोः भेदा एव न भवन्ति। यथा कोऽपि परित्यज्य सर्व व्रजति इति 'परिव्राट्' भवति।

अन्यदपि परिवारे पितामहस्य पितुः पुत्रस्य च अधिकाराः भवन्ति। तथैव व्याकरणे सूत्राणामधिकाराः भवन्ति, तद्यथा– ''अव्ययीभावः'' = अधिकारोऽयं प्राक्तत्पुरुषात्, ''तत्पुरुषः''= अधिकोरोऽयं प्राग्बहुव्रीहेः। इति दिङ्निर्देशः।

**''सामाजिकजीवनम्''–**

पुरुषाणां स्त्रीणां वा समूहः समाजः भवति। अथवा मातृ-पितृ-पुत्र-पौत्रादीनां समूहः परिवारः परिवाराणां समूहः समाजः भवति। ''समाजं समवति रक्षति वा यज्जीवनं तज्जीवनं सामाजिकजीवनं भवति''। अर्थात् ''यादृशजीवनेन समाजः रक्षितो भवति सम्मिलितश्च भवति तज्जीवनमेव सामाजिकजीवनं वक्तुं शक्यते''।

एतादृशं जीवनं व्याकरणशास्त्रे कथम्? व्याकरणशास्त्रे प्रादीनां, चादीनां स्वरादीनां, सर्वादीनां, भ्वादीनां परिवाराः सन्ति, तेषां समूहत्वेन व्याकरणशास्त्रम्। अत एव व्याकरणशास्त्रं समाजः। यथा समाजे सर्वविधजनाः सन्ति, तथा व्याकरणशास्त्रे सर्वविधसूत्राणि सन्ति।

यथा समाजे न्यायाधीशः न्यायपालको वा भवति अव्यवस्थासु व्यवस्थां करोति, अनियमे नियमं करोति, स्वयमेव नियमपालनपुरस्सरं जनैः नियमान् पालयति, तथैव व्याकरणे परिभाषासूत्राणि भवन्ति, परिभाषा वा भवन्ति, याः नियमान् पालयन्ति। तद्यथा-''सुध्युपास्यः'' इति शब्दस्य प्रक्रियावस्थायाम् ईकारस्य स्थाने चतुर्णा यणामादेशः प्राप्तो भवति। तदा चतुर्ष्वपि यण्सु मध्ये विवादः भवति 'य् व् र् ल्' मध्ये एकः कः भविष्यति? तदा ''स्थानेऽन्तरतमः'' इति परिभाषासूत्रमागत्य कथयति-यस्य सादृश्यं मिलति स एव भविष्यति।

समाजेऽपि पदेषु नियुक्तिः सादृश्यानुसारम् एव भवति। अध्यापकस्य स्थाने अध्यापकस्य, जिलाधिकारिणः स्थाने जिलाधिकारिणः, न तु परिचारकस्य लिपिकस्य वा।

शब्दशास्त्रे एतादृशं सादृश्यं चतुर्विधं भवति–स्थानकृतं प्रथमम्। अर्थकृतसादृश्यं द्वितीयम्, गुणकृतसादृश्यमर्थात् ब्राह्मप्रयत्नानां सादृश्यं तृतीयम्, चतुर्थं च प्रमाणकृतसादृश्यं भवति अर्थात् मात्राकृतसादृश्यम्। एषां क्रमशः उदाहरणानि यथा–''सुध्युपास्यः'', अत्र तालव्यस्य ईकारस्य स्थाने तालव्यो यकारः आगच्छति। ''कोष्टु'' इति श्रृगालवाचकस्य स्थाने श्रृगालवाचक एव ''कोष्टृ'' इति शब्दः आदिष्टः भवति, ''वाग्घरिः'' इत्यत्र हकारस्य स्थाने बाह्यप्रयत्नसादृश्येन तादृश एव घकारः आदिष्टो भवति, ''अमू'' ''अमी'' इत्यत्र च दीर्घद्विमात्रिक-अचः स्थाने द्विमासिक एव ऊकारः ईकारो वादिष्टो भवति।

परिवारे समाजे चोभयत्र कानिचन कार्याणि अन्तरङ्गत्वेन भवन्ति, कानिचन च भवन्ति। बहिरङ्गत्वेन। उभयविधकार्ययोः समुपस्थितयोः सतोः किंविधं कार्य कारणीयमिति सर्वे जानन्ति

शेषभागःषष्टमपुटे

पंचमपुटस्य शेषभागः

## संस्कृत-व्याकरणे.......

अपि, कुर्वन्ति अपि।

व्याकरणशास्त्रे परिभाषा एवं निर्मिताः सन्ति-''अल्पापेक्षत्वमन्तरङ्गत्वम्'' ''बह्वपेक्षत्वं बहिरङ्गत्वम्,'' अथवा धातूपसर्गयोः कार्यमन्तरङ्गम् अन्यद् बहिरङ्गम्। ''असिद्धं बहिरङ्गमन्तरङ्गे'' अर्थात् अन्तरङ्गकार्यस्य कर्तव्यतायां बहिरङ्गकार्यमसिद्धमेव भवति।

परे कुत्रचित् अस्य विरोधोऽपि दृष्टो भवति, तस्य कृते व्याकरणे व्यवस्था अस्ति किम्? आम्! अस्ति!! मन्ये तदपवाद एव भवति परिभाषा यथा-''पूर्व-पर-नित्य-अन्तरङ्ग-अपवादानाम् उत्तरोत्तरं बलीयः।'' अपवादः सर्वत्र बलवत्तमा एव भवन्ति। ''अन्तरङ्गादपि अपवादो बलीयान्''।

**''राजनैतिकजीवनम्''-**

''नीयते राजा अनया इति राजनीतिः'' अथवा ''राज्ञा नीयन्ते प्रकृतयः राज्याङ्गानि वा इति राजनीतिः''। राजा नाम मुख्यः पुरुषः, सः यया नीत्या आनुकूल्यं भजते सा नीतिः राजनीतिः। अथवा राज्याङ्गानि प्रजाः वा यया नीत्या राज्ञा सह आनुकूल्यं भजन्ते सा नीतिः राजनीतिः''। एवंविधनीतिपुरस्सरं रज्जीवनं भवति तदेव राजनैतिकजीवनं भवति''। अत्र परिवारे यो मुख्यः पुरुषः अथवा समाजे यो मुख्यः पुरुषः आहोस्वित् राज्ये यो मुख्यः पुरुषः स एव ''राजा''। तस्य, तेन सह वा या नीतिः सा राजनीतिः। तस्य आनुकूल्यं सर्वान् प्रति अथवा तेषाम् आनुकूल्यं तं प्रति येन जीवनेन तज्जीवनं राजनैतिकजीवनम्।

मन्ये एतादृशं जीवनं सर्वतः, सर्वतः, सर्वथा सर्वदा, सर्वधा, सर्वत्र च सावधानतया भवति, नो चेत् वैफल्यमेवाधिगच्छति। अतः अत्र सर्वातिशयत्वेन शत्रोः मित्रस्य च परिचयमेव सम्यक् स्वीकुर्यात् सम्यग् भवेत् च। मित्रस्य शत्रोश्च परिचयाभावे, स मुख्यः पुरुषः भवेत्, नृपः भवेत्, प्रजा वा भवेत् पतित एव भविष्यति।

एतदर्थमपि व्याकरणशास्त्रेऽस्ति निर्देशः-यथा ''शत्रुवदादेशाः'' ''मित्रवदागमाः'' अर्थात् व्याकरणशास्त्रे यण्-अयादयो गुणवृद्ध्यादयो यावन्त आदेशाः, ते समेऽपि शत्रुवदेव भवन्ति। यावन्तो वा आगमाः कुक् टुक्, धुट्, नुट्, इत्यादयः ते समे मित्रवदेव सन्ति। मित्रस्य कृते स्थानं निर्धारितं भवति। अतः ''आद्यन्तौ टकितौ' इति सूत्रमस्ति टित आगमाः आदौ भवन्ति, किदागमाश्चान्ते भवन्ति। इत्थं कृते सति एव शब्दरूपाणां सिद्धिः भवति। स्वरूपं च स्थिरं भवति। जीवनेऽपि इत्थं यो जीवति मन्ये स एव स्थिरं दृढं च भवति।

**''पारमार्थिकजीवनम्''**

''पुरुषाणाङ्कृते चत्वारोऽर्थाः भवन्ति। त एव पुरुषार्थाः कथ्यन्ते, ते च धर्म-अर्थ-काम-मोक्षाख्याः सन्ति। एतेषु परमः, चरमः, अन्तिमो वा अर्थः ''मोक्षः'' अस्ति। मोक्षश्च स्वस्वरूपावाप्तिः भवति। तस्य कृते यज्जीवनं भवति तदेव पारमार्थिकजीवनं भवति। अर्थात् ''स्वस्वरूपावाप्तिः यस्य भवति तस्य जीवनं पारमार्थिकजीवनं वक्तुं शक्यते''। अपि चास्मिन् संसारे यावन्तो मनुष्याः परमार्थं, मोक्षं, स्वस्वरूपं प्राप्तुं यतमानाः सन्ति, तेषां जीवनं पारमार्थिकजीवनमस्ति।

अमृतबिन्दूपनिषदि एवं निर्दिष्टम्-

**द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥**

इत्थमत्र शब्दशास्त्रस्य सातिशयत्वमेव सूचितम्। परमार्थमधिगन्तुं शब्दशास्त्रे नाम व्याकरणशास्त्रे निष्णातः सन्नेव स्वस्वरूपमधिगच्छति।

एवमपि अस्य शब्दशास्त्रस्य सातिशयत्वं सूचितं भवति-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥**

अत एव परिभाषेयं विश्रुता लोके-

''अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः''। अर्थात् व्याकरणशास्त्रे अर्धमात्राया अपि आधिक्यं नास्ति। शास्त्रमिदं न्यूनातिरिक्तवृत्तिरहितमेव, यतोहि त्रिमुनि व्याकरणम्। एवम् अपि उक्तम्-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

एतादृशं व्याकरणम्। अस्मिन् व्याकरणे अपि अस्य जीवनस्य इत्थं स्वरूपं चिन्तयन्तु भवन्तः। मन्ये, व्याकरणशास्त्रे प्रकृतिभावः इदमेव स्वरूपं स्पष्टं करोति पारमार्थिकजीवनयुक्तस्य जीवनस्य। यतो हि जीवनस्य स्वस्वरूपमेव प्रकृतिः, स्वस्वरूपप्राप्तिरेव प्रकृतिभावः। यथा-अहो ईशाः, अमी ईशा, इ इन्द्रः, उमेशः। अत्र सर्वत्र प्रकृतिभाव एव। इत्थमेव ''सुद्ध्युपास्यः'' इति सिद्धावस्थायाः मध्ये यदा साध्यावस्था प्रक्रियावस्था, जीवात्मा अपि सिद्धावस्थाया प्रकृतिभावत्वमेवाधिगच्छति। स्वस्वरूपमेवप्राप्नोति।

एवमत्र सर्वविधजीवनानां संक्षिप्तं स्वरूपं प्रदर्शितं तच्च व्याकरणे कथं दृष्टं भवति इत्यपि अतिसंक्षेपेण लिखितम्।

**''व्याकरणे जीवनदर्शनस्य समीक्षणम्''-**

इदानीं संसरति इति संसारः। एतादृशे संसारे यथा क्रियान्वितं जीवनं दृष्टिपथमायाति तथा ''सुद्ध्युपास्यः'' इत्यस्य प्रयोगे पश्यामः। तद्यथा- ''सुद्ध्युपास्यः'' 'सुधी+उपास्यः' इमे पदे संहितायां विषये तिष्ठतः। अतः लक्ष्यानुरोधेन प्रथमत्वेन ''इको यणचि'' इति त्रिपदात्मकं सूत्रमागच्छति, कथयति च ''इकः स्थाने यणं करिष्यामि, परं तस्यैव इकः स्थाने यस्य अच् अस्ति समीपे''। इदमत्र ध्येय यत्त्रिविधमधिकरणं भवति। अभिव्यापकाधिकरणं यथा-तिलेषु तैलम्, वैषयिकाधिकरणं यथा-मोक्षे मोक्षे इच्छास्ति, औपश्लेषिकाधिकरणं यथा-वटे गावः। तद्वदत्र-औपश्लेषिकाधिकरणमेव ''अचि'' पदे अस्ति, अतः यस्य इकः समीपे अच् अस्ति, तस्यैव स्थाने यण् भविष्यति। अतोऽप्यधिकतरं स्पष्टं कर्तुमत्र ध्वनिच्छेदः करणीयः।

''स् उ ध् ई + उ प् आ स् य् अः'' अत्र रेखाङ्किताः यत्रः ''इक्''-वर्णाः लब्धाः। ''इको यणचि'' सूत्रमिदं चिन्तयति यदत्र दीर्घ 'ई' कारः इक् अस्ति, अनन्तरम् 'उ' कारः अच् समीपे अस्ति। अतः ईकारस्य स्थाने यणं करोमि। अत्र यण् आदेशरूपेण भविष्यति। आदेशश्च शत्रुवद् भवति। शत्रोः देवा मानवा वा सर्वे बिभ्यति, का कथा वराकस्य ईकारस्य। अतः ईकारः प्राणरक्षणार्थ मार्गं चिन्तयति-

**तावद् भयस्य भेतव्यं यावद् भयमनागतम्।**
**आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम्॥**

कथयति च 'इको यणचि' सूत्रं प्रति यन्मदुत्तरवर्ति 'उ' कारः इक् अस्ति, तत्र यण् विधीयताम्। अहमच्त्वेन समीपेऽस्मि। परमिदङ्कं रामलक्ष्मणयोर्मध्ये भ्रमन्त्याः शूर्पणखाया इव 'इको यणचि' इत्यस्य स्थितिः जाता। यतो हि उकारेणाप्येवमेवोक्तं यदहमच्त्वेन समीपेऽस्मि, ईकारस्यैव स्थाने यण् विधीयतामिति। परं कर्मयोगी इवान्यायेन धर्षित इव वा यण् कार्यं कर्तुं निश्चयङ्करोति, न्यायं च प्राप्तुमग्रगामी भवति ''इको यणचि'' इति सूत्रम्। तत्र साध्नोति परकार्यमिति साधुः स इव आहोस्वित् न्यायाधीश इव मिलति ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' इति परिभाषासूत्रम्।

''अव्यवस्थायां व्यवस्था-सम्पादिका परिभाषा भवति'' अथवा ''अनियमे नियमकारिणी परिभाषा भवति''। अत इदमवलोक्य ''इको यणचि'' सूत्रं प्रति कथयति असौ यत्-'सप्तम्यन्तपदोच्चारणेन क्रियमाणं कार्यं तेन सप्तम्यन्तपदेन बोध्यमानेभ्यो वर्णेभ्योऽव्यवहितपूर्वस्यैव भविष्यति'। श्रुत्वेद ''इको यणचि'' चिन्तयति यत् ईकारमच्त्वेन स्वीकरोमि चेत् कार्यं पूर्वस्य इकः स्थाने भविष्यति, पूर्वम् इक् 'सू' घटक उकारः, अस्ति, परं स धकारेण व्यवहितोऽस्ति, अतः ''उपास्य'' पदघटक उकार एव अच् भविष्यति, इति निश्चयसमकालमेव ''श्रेयांसि बहुविघ्नानि'' इमां सूक्तिं चरितार्थीकुर्वता चतुर्णां यणां मध्ये विवादः संजातः, यत्को भविष्यतीति। अत्र पुनः अव्यवस्था संजाता, अतः ''इको यणचि'' इति सूत्रं पुनरग्रे गच्छति, तदा मिलति ''स्थानेऽन्तरतमः'' इति परिभाषासूत्रं, कथयति च-''यस्य सादृश्यातिशयः स भवतु'' अतश्चतुर्विधसादृश्येषु स्थानकृतसादृश्येन यकार एव भवति, तदा ''सु ध् य्+ उपास्यः'' इति जातम्। अनन्तरमागच्छति ''अनचि च'' इति सूत्रम्। अवलोकयति च यद् अचः परो यर् धकारः अस्ति, ततः परे अच् नास्ति, अतः स्वप्रतिज्ञानुसारमेकस्य यरः स्थाने शत्रुवद् द्वित्वादेशं कृतवान् ''सु ध् ध् य् + उपास्यः'' इति स्थितिः संजाता। अत्र ''झलां जश् झशि'' इति सूत्रेण स्वप्रतिज्ञानुसारं झशि परतः अव्यवहितपूर्वत्वेन दृष्टस्य झलः स्थाने जश् विहितः। तदनन्तरं ''हलोऽनन्तराः संयोगः'' इति संज्ञासूत्रेण परोपकारधिया आगत्य संयोगसंज्ञा विहिता '' द् ध् य्'' इत्येतेषाम्। इदानीमेवात्रागच्छति अनैतिकाचरणं कर्तुम् एव जीवितं यस्य तद्, शब्दसिद्धौ विघ्नोत्पादकम् अथवा स्वरूपावाप्तौ प्रयत्नविध्वंसकम् ''संयोगान्तस्य लोपः'' इति सूत्रम्, इच्छति च ''सु द् ध् य्'' इति संयोगान्तपदस्य लोपम् अदर्शनं वा। अस्मिन् क्षण एव पण्डितत्वेन ज्ञानिवद् वा आगच्छति। ''अलोऽन्त्यस्य'' इति परिभाषासूत्रं, चिन्तयति च ''सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डितः'' अतः यकारं लोपत्वेन समर्प्यं पदं रक्षति। तस्यापि यकारस्य संरक्षणं वार्तिकेन ''यणः प्रतिषेधो वाच्यः'' इत्यनेनागत्य ईश्वरेच्छया इव कृतम्। अनन्तरं वर्णसम्मेलनेन ''सुद्ध्युपास्यः' इति सिद्धम्। अर्थात् सिद्धावस्थायाम् अनेन स्वस्वरूपावाप्तिः कृता।

इत्थमत्र विचारयन्तु भवन्तः ''इको यणचि' इति सूत्रस्य प्रयत्नः, ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' ''स्थानेऽन्तरतमः'' अनयोः सहयोगः, ''अनचि च'', ''झलां जश् झशि'', ''हलोऽनन्तराः संयोगः'' एतेषामुद्यमशीलता, ''संयोगान्तस्य लोपः'' इत्यस्यानैतिकचरणं ''अलोऽन्त्यस्य'' इत्यनेन संरक्षणं, ''यणः प्रतिषेधो वाच्यः'' इति वार्तिकस्याकस्मिकत्वेनागमनं वर्णसम्मेलनानन्तरं शब्दस्य सिद्धिः।

इत्थं सर्वत्र समेषां जीवने सर्वविधघटनानां घटनं भवति।

भो भो! विद्वन्मूर्धन्याः! गुणैकपक्षपातिनः! सहृदयशिरोमणयः! नीक्षीरविवेकिनश्च! विद्वांसः! विचारयन्तु भवन्तः व्याकरणशास्त्रे यादृशजीवनमत्र समुपस्थापितं मया, तच्चिन्तनस्यैका सरणिरेव।

यथा सर्वविधदर्शनानां लक्ष्यमेकान्तत्वेन दुःखहानिरेव। सा च तत्त्वाधिगमादेव। तत्त्वाधिगमश्च सर्वविधैषणासमाप्तेरनन्तरमेव। एषणासमाप्तिश्च सर्वविध ऐहिकामुष्मिकसुखदुःखानुभवपूर्वकवैराग्यादेव। स च सम्यक्जीवनदर्शनस्य सम्यक् परिपालनादेव भविष्यति। सम्यक् जीवनदर्शनस्य प्राप्तिः संस्कृतवाङ्मयस्याध्ययनाद् मननाच्च भविष्यति।

मन्ये संस्कृतवाङ्मये व्याकरणस्याध्ययनाध्यापनमतीव कठिनं भवतीति यो दुरपवादः समाजे प्रसृतः स निर्मूलत्वमेव प्राप्नुयादिति मम लक्ष्यम्। अत्र च भवत्सदृशा विद्वांस एव प्रमाणम्।

व्याकरणस्य विदुषः प्रति वैयाकरणान् प्रति वा ममेयं करबद्धप्रार्थना अस्ति- ''यत्ते शब्दजालादवतीर्य प्रथमं सरलरूपेण मातृभाषायां वा सूत्राणां, वार्तिकानां, परिभाषाणां, फक्किकानां वा अभिप्रायावबोधनं कथानकरूपेण संवादरूपेण वा कारयन्तु बालान् प्रति जिज्ञासून् प्रति वा। अनन्तरं ये जिज्ञासवः विद्यार्थिनो वा शब्दजालं अवबोद्धुं, हृदि स्थापयितुं च समर्थाः, तान् प्रति शब्दजालं प्रसारणीयम्। इत्थं कृते सति व्याकरणभूमिः या मरुभूमित्वेन ख्यापिता अस्ति, सा सुजला मलयजशीतला च भविष्यति।''

ॐशम्!


**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**



G.C.ENTERPRISES
**GOVT. CONTRACTOR**
**Prop. TARLOK PAPNEJA**
***SPECIALIST IN WATER TREATMENT***
**C-3/153, Yamuna Vihar, Delhi - 53**
**Phone : 22911281, 22919451**

# यखविष्यो विनश्यति

कस्मिंश्चित् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यखविष्यः चेति त्रयः मीनाः आसन्। ते स्वीयैः अनुचरैः सह सुखेन जीवन्ति स्म।

एकदा केचन धीवराः तस्य जलाशयस्य समीपम् आगतवन्तः। तदा साञ्चालसमयः जलाशयं दृष्ट्वा धीवराः परस्परम् उक्तवन्तः-''एतस्मिन् जलाशये बहवः मीनाः तु सन्ति। परन्तु इदानीं तेषां ग्रहणं कष्टकरम्। अतः वयं श्वः प्रातःकाले अत्र आगत्य एतान् ग्रहीष्यामः'' इति। अनन्तरं ते ततः गतवन्तः।

धीवराणां सम्भाषणं श्रुत्वा अनागतविधाता उक्तवान्-''भोः! धीवराणां वचनं श्रुतं किल? ते श्वः आगमिष्यन्ति। अत्र स्थास्यामः चेत् अवश्यम् अस्माकं मरणं भविष्यति। अतः वयम् इदानीम् एव अन्यं जलाशयं गच्छाम'' इति।

प्रत्युत्पन्नमतिः उक्तवान्- ''सत्यं, शीघ्रमेव अन्यत्र गच्छाम'' इति।

परन्तु यखविष्यः एतत् श्रुत्वा उच्चैः हसितवान्। उक्तवान् च-''भोः! भवतोः बुद्धि एव नास्ति। कस्यचित् धीवरस्य वचनेन एतम् उत्तमं जलाशयं परित्यज्य किमर्थं गच्छेम? एतत् न उचितम्। अस्माकम् आयुः अस्ति चेत् अत्र तिष्ठेम चेदपि जीवेम एव। आयुः नास्ति चेत् अन्यत्र गच्छेम चेदपि अस्माकं मरणं भविष्यति एव। अहं तु कुत्रापि न आगच्छामि। भवन्तः यथा इच्छा तथा कुर्वन्तु'' इति।

तदनन्तरम् अनागतविधाता प्रत्युत्पन्नमतिः च रात्रौ एव ततः अन्यं जलाशयं गतवन्तौ।

प्रातः काले ते धीवराः तत्र आगतवन्तः। तस्मिन् जलाशये स्थितान् सर्वान् अपि मीनान् ते गृहीतवन्तः। यखविष्यः अपि तैः गृहीतः मारितः च।

**अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।**
**द्वावेतौ सुखमेधेते यखविष्यो विनश्यति॥**

(पञ्चतन्त्रकथाया साभारः)

# इदं मे संस्कृतम्

-डॉ. जनार्दन प्रसाद पाण्डेय 'मणि'
उपाचार्यः, राष्ट्रिय संस्कृत संस्थानम्
गंगानाथ झा परिसरः, इलाहाबादः, उत्तर प्रदेशः

इदं मे संस्कृतं जीवातुभूतं जीवनानाम्।
रसोऽस्मिन् स्यन्दते रागारुणानां कल्पनानाम्॥1॥

क्षयं याति स्वयं यत्क्रोडके दुःखार्द्ररात्रिः।
इदं तज्ज्योतिरीड्यं शारदानेत्राध्वराणाम्॥2॥

जनिं लब्ध्वा विभासन्तेऽत्र कुक्षौ यस्य विद्याः।
इदं तन्मातृतत्त्वं संस्कृतीनां सभ्यतानाम्॥3॥

शिवत्वं जृम्भते यस्मिन्नजस्रं लोकभूत्यै
इदं तद्धाम बन्धो! निश्छलानां भावनानाम्॥4॥

यदङ्कं प्राप्य मुग्धः स्पन्दते सुस्वप्नराशिः
इदं तद्वाग्वपुर्विश्वम्भराणां श्रीधराणाम्॥5॥

अनन्तं विस्तृतं ब्रह्माण्डमेतद् यस्य गाथा
इदं तद्बोधिबीजं प्राणिनां प्राणीश्वराणाम्॥6॥

न राष्ट्रं भारतं विस्मृत्य यन्मे भारतं स्यात्
इदं तद्गौरवं मे भास्वराणां भारतानाम्॥7॥

मणेर्मे गीतिराधत्ते गरिम्णां यस्य कीर्तिम्
इदं तत्पूतपेयं भावुकानां भावकानाम्॥8॥

# किं कुर्यात्

-डॉ.रमाकान्त शुक्लः

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात्।
विरुद्धे भागधेये कर्म कुर्वाणोऽपि किं किं कुर्यात्॥1॥
'विलिण्टाइन' दिने छात्राः कुसुमहस्ता गताः पार्के।
वराकोऽध्यापको गत्वापि कक्षे ब्रूहि किं कुर्यात्॥2॥
गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम्।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात्॥3॥
गृहाच्चलितः समयतोऽहं परं मध्येपथं रूद्धः।
'विलम्बादागतोऽस्मी' ति क्षमायाच्ञापि किं कुर्यात्॥4॥
उपस्थितिपञ्जिकास्ते द्वारि चारक्षी लगुडहस्तः।
तथापि त्वं त्वदीयैस्ताड्यसे चेत्कोऽत्र किं कुर्यात्॥5॥
भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात्॥6॥
श्रुतो धर्मः कृता सन्ध्या, श्रिते चाभ्यासवैराग्ये।
जहाति च नैव चाञ्चल्यं मनः किल कोऽत्र किं कुर्यात्॥7॥
अहं यां चिन्तयाम्यनिशं विना यां नो लभे निद्राम्।
न सा दूरध्वनौ सुलभा, जनोऽत्रं मित्र! किं कुर्यात्॥8॥
प्रिया भार्या त्वमसि, वदसि प्रियं प्रियमण्डने, पत्यै।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात्॥9॥
वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात्॥10॥
महामात्योऽटलोऋध्यक्षो मुशर्रफ् चागरानगरे।
शिखरवार्तावसाने निष्फलो! कः कोऽत्र किं कुर्यात्॥11॥
'मृतो वा जीवितो वापेक्ष्यते न्यायाय लादेनः।
प्रतिज्ञायापि नो लभते बुशस्तं चेत्स किं कुर्यात्॥12॥
कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम्।
इदानीं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात्॥13॥
इमे प्रतिपक्षिणो भूत्वा समायाता वृकाः सदने।
परं तत्रैकतां प्राप्ता ऋजुर्मेषोऽत्र किं कुर्यात्॥14॥
इमे बहुनायका रथिनो रथं विमता यदारूढाः।
निनीषुस्तं प्रमुखसारथिरयं विवशो किं कुर्यात्॥15॥
मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः।
ददासि न चेत्त्वमुत्कोचं तदा नेतापि किं कुर्यात्॥16॥
अरण्ये रोदनं कुरुषे बधिरकर्णे जपसि बन्धो!
पठितवानसि बहून् ग्रन्थान्, त्वदर्थं कोऽपि किं कुर्यात्॥17॥
गृहीत्वा पाटलं पुष्पं वसन्तो द्वारि सम्प्राप्तः।
मनसि किल पत्रशातनमस्ति, मधुमासोऽत्र किं कुर्यात्॥18॥
कवी रात्रौ लिखति कवितामपरकोशं मुहुः पश्यन्।
न च श्रोतास्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात्॥19॥
कृते यत्नेऽपि मुद्रणदोषतो मुक्तिर्न यदि लभ्या।
तदाक्षरयोजकः सम्पादको वा मित्र! किं कुर्यात्॥20॥
अहं शस्त्रास्त्रसम्पन्नो भटः सीमासु तिष्ठामि।
न चादेशं लभे युद्धस्य, शौर्यं मेऽत्र किं कुर्यात्॥21॥
मदीयौ द्वौ सखायौ हस्तमेलनमद्य नो कुरुतः
तयोर्मैत्रीं विद्धक्षुश्चेज्ज नोऽयं ब्रूहि किं कुर्यात्॥22॥
यायोरशनं कुलं शीलं तथा कर्माणि भिद्यन्ते।
तयोर्मैत्रीं विवाहं चेच्छसि त्वं? कोऽत्र किं कुर्यात्॥23॥
स्वराष्ट्रस्य प्रगतिमिच्छन्ति कवयोऽध्यापका वीराः।
भटा उद्योगिनः श्रमिणः, कुनेता किन्तु किं कुर्यात्॥24॥
यदास्माभिश्चिताः प्रभवो मलीमसकर्म कुर्वाणाः।
मुहुर्गायन् 'स्वभारतभा' रमाकान्तोऽपि किं कुर्यात्॥25॥

(रचनातिथिः 16.2.2002)

# ''भारतस्य गौरवम् देववाणी''



आचार्य राधेश्याम अवस्थी 'रसेन्दु'
साहित्यविभागाध्यक्ष
संस्कृतमहाविद्यालयः वेदामऊ वैदिक विद्यापीठ, बदायूँ।
दूरवार्ता – 9456400696, ई-मेल-aacharyarsawasthi57@gmail.com

देववाणी ''संस्कृत भाषा'' भारतस्य मूल स्त्रोतः अस्ति। तथाऽच्च अद्यापि वैदेशिकाः अत्र संस्कृतस्य ज्ञानं अर्जितुं आगच्छन्ति। इयं भाषा अस्मान् मातृवत् पालयति पोषयति च। अस्य रक्षा अस्माकं सर्वेषां पुनीतं कर्तव्यं अस्ति। सार्वभौमिकसत्यमस्ति यत् संस्कृत भाषासृष्ट्या सह एव समुत्पन्ना। पाश्चात्य जनैः एतस्योपरि बहुविधा कुठारघातः कृताः। तथापि एषा अमृत वाणी – देववाणी वर्तते। यथा गंगा नदी सागरपर्यन्तं सर्वेषां कल्याणं विदधाति तथैव संस्कृत अपि सम्पूर्ण विश्वस्य जनानां कल्याणं करोति। संस्कृतेन विना अस्माकं संस्कृतिः सुरक्षितानास्ति संस्कृत भाषायां आवश्यकता सर्वेभ्यः अस्ति। प्राचीन काले स्वर्णिम समयः आसीत् यदा नृपाः भृत्याः आवालवृद्धाः सर्वे एव संस्कृतेन वदन्ति स्म। तस्मिन्नेव समये अस्माकं देशे संस्कृत भाषा एव जनभाषा आसीत्। तर्हि एतस्य पतनस्य कारणं विश्लेषणं अस्मांभि कर्तव्यम्। संस्कृत भाषां एवं भारतस्य गौरवम् पुनः स्थापयितुम् शक्नोति। संस्कृतानुरागिभिः सर्वैः एव संस्कृतरक्षायाः अस्य प्रचार प्रसारस्य प्रयासः सदैव करणीयाः अद्य एतस्मिन् पवित्र कार्ये ये निरतां ते भृशं प्रशंसाया पात्राणि सन्ति। देशस्य सर्वाः एव भाषा संस्कृतमया सन्ति। बहुखेदमस्ति यत् वयं आंग्लजनैः तन्त्रं तु प्राप्तवन्तः। परञ्च एतद्तन्त्रं अस्माकं नास्ति। साम्प्रतं अस्माकं देशे आंग्लवेषभूषायाः आंग्लभाषाया वर्चस्वं पदे-पदे दृश्यते।

अस्माकं व्यवहारे सर्वत्र आंग्ल संस्कृते प्रभावः वध 'मानः दृश्यते। सम्पूर्ण विश्वपरिवार भावनया दर्शनस्य प्रेरणा केवलं संस्कृतेऽव विद्यते। संस्कृत केवलं भाषा एव नास्ति अपितु एषा अस्माकं जीवनं पद्धतिः अस्ति। अत्र शिक्ष्यते यत् जीवने अस्माभिः कथं व्यवहारः करणीयाः। कथं महिलाभिः आचरणीयं। कथं आत्मनः विश्वस्या विहितम् चिन्तनीयम्। सा सर्वान् प्रतिभागिनां निरन्तरं संस्कृतं संभाषितुं प्रेरितवान्। संस्कृतमातुः अस्मासुमहती कृपास्ति यत् सा अस्मान् ऐतेभ्यः पुण्य कार्याय प्रेरयति। संस्कृत सेवा कुर्वन्तः एव वयं जीवनं धन्यं कर्तुं शक्नुमः। अहं कामये यत् तादृशः समयः आगच्छेत यदा संस्कृत भाषा अस्माकं देशस्य जनेभाषाभवेत्।

**जन्मतः मृत्यु पर्यन्त या गामिनी,**
**प्राणभूताऽमरा वाक् सुधाऽ श्राविणी।**
**भारतस्यात्मभूता सदा वन्दिता,**
**दीप्यते भारते सर्वदा संस्कृतम् ॥**

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड )
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

# भाषायाः क्षेत्रे उल्लेखनीययोगदानाय 2015वर्षस्य राष्ट्रपतिपुरस्काराः प्रदत्ताः

नवदेहली । भाषायाः क्षेत्रे उल्लेखनीययोगदानाय विदुषां कृते राष्ट्रपतिना श्रीप्रणवमुखर्जीमहाभागेन 2015वर्षस्य पुरस्काराः प्रदत्ताः



। यस्मिन् संस्कृते कृते विशिष्टयोगदानाय पञ्चदशविभूतयः सम्मानिताः । येषु डॉ.शशितिवारी, प्रो.लक्ष्मीश्वरझा, प्रो. सुधाकरदीक्षितः, प्रो.जी.महावलेश्वरभट्टः, श्रीएस.एम. वीरराघवाचारः, श्रीवेदरत्नकेशवसीतारामजागलेकरः, प्रो.ए. हरिदासभट्टः, पं.श्रीकृष्णशास्त्री काशीनाथशास्त्री जोशी, प्रो. रामकिशोरशुक्लः, ब्रह्मश्रीगुल्लपल्लिवेंकटनारायणघनपाठी, प्रो. हरिदत्तशर्मा, प्रो.ओमप्रकाशपाण्डेय, डॉ.कैलाशचन्द्रदवे, प्रो. जगन्नाथशास्त्री, डॉवाचस्पतिमैठाणी, इत्येते सम्मानिताः । संस्कृतस्य कृते अन्ताराष्ट्रियविद्वांसः श्रीआस्कोपार्पोलामहोदयः सम्मानिताः ।

अस्मिन् अवसरे युवाप्रतिभानां कृते भाषायां विशिष्टयोगदानाय महर्षिबादरायणव्याससम्मानमपि प्रदत्तम् । येषु संस्कृतभाषायाः कृते प्रो.विरूपाक्ष वि.जड्डीपालः, डॉ.रत्नमोहनझा, डॉ. विष्णुपदमहापात्रः, डॉ.प्रसादप्रकाशजोशी, डॉ.देवीप्रसादमिश्रः च सम्मानिताः । अस्मिन्नवसरे राष्ट्रपतिभवने आयोजिते समारोहे केन्द्रीयमानवसंसाधनमविकासमन्त्रिमहोदया श्रीमतिस्मृतिईरानीसहितं संस्कृतविश्वविद्यालयानां कुलपतयः गणमान्यजनाश्च उपस्थिताः आसन् ।

## २०१५वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तृणां संक्षिप्तपरिचयः ( १ )

## डा. ( श्रीमती ) शशि तिवारी



चत्वारिंशदधिकवषेभ्यः संस्कृतस्य वेदस्य च प्राध्यापनेऽनुसन्धाने च निष्ठापूर्वकं समर्पिता डा. (श्रीमति) शशि तिवारी (जन्मतिथिः 16/10/1945) वैदिकवाङ्मयस्य संस्कृतसाहित्यस्य च सुप्रतिष्ठिता विदुषी अस्ति। तया लखनऊविश्वविद्यालयतः 1965तमे वर्षे संस्कृतविषये एम.ए.परीक्षा सवोच्चाङ्कलाभपूर्वकं स्वर्णपदकैः सह उत्तीर्णा। तत एव 1986तमे इसवीयवर्षे वेदविषये पीएच.डी. इति शोधोपाधिर्लब्धः। 1968तमे वर्ष एव आगराविश्वविद्यालयस्य बैकुन्ठीदेवीमहाविद्यालयेऽध्यापनवृत्तिः प्रारब्धा। 1972तः 2010 यावत् दिल्लीविश्वविद्यालयस्य मैत्रेयीमहाविद्यालये प्राध्यापिका-उपाचार्यादिपदेषु कार्यं कृतं परं साकमेव दिल्लीविश्वविद्यालयस्य संस्कृत-विभागे अतिथि-आचार्यरूपेण स्नातकोत्तरकक्षासु वैदिकसाहित्यं पाठितम्। 2002तमे वर्षे अमेरिकादेशस्य औरलैण्डोनगरे हिन्दू युनिवर्सिटी ऑफ अमेरिका नामके विश्वविद्यालये विजिटिंग-प्रोफेंसररूपेण प्राचीनभारतीयशास्त्राणामध्यापनमपि कृतम् अद्याप्यस्ति तत्र मानदाचार्या। एतस्याः शोधनिर्देशने दिल्लीविश्वविद्यालस्य द्वादशसंस्कृतशोधच्छात्रैः एम.फिल., पीएच.डी. इत्यादयः शोधोपाधयः अधिगताः।

1996तः एव 'बृहत्तर वैदिक अध्ययन परिषद्' (वाइडर एसोसिएशन फार वैदिक स्टडीज-वेव्स) इति अस्याः पंजीकृतशैक्षणिकसंस्थायाः महासचिवपदं सेवमानया आचार्यया शशितिवारीमहोदयया व्यापकस्तरे वैदिकज्ञानस्य व्यावहारिकतायाः प्रासङ्गिकतायाश्च विषयेऽनुपमकार्य विहितम्। अनेन माध्यमेनऽधुनावधि उनविशंतिराष्ट्रियसंगोष्ठीसम्मेलनानां समायोजनम् अनया सफलतापूर्वकं भारतस्य विभिन्नभागेषु कृतम्। अमेरिका-इटली-कनाडादिदेशेषु आयोजितषु षोडशाधिकान्ताराष्ट्रियसम्मेलनेषु एतस्या सहभागिता विदेशुषे भारतीयज्ञानस्य वेदविद्यायाश्च प्रसारे सक्रिययोगदानस्याधरोऽस्ति। 2014तमे वर्ष एव अमेरिकादेशस्य फेयरफील्डनगरे आयोजित एकादशे विश्ववैदिकसम्मेलने मुख्यवक्त्री सहाध्यक्षा चासीत्। शतप्रायाणां शैक्षणिककार्यक्रमाणां समायोजनं कृत्वा एषा जनसामान्येषु शोधच्छात्रेषु च वैदिकज्ञानपरम्परां प्रति जागरूकतासमुत्पादने सार्थकं प्रयासं कृतवती।

डा. तिवारीमहोदयया वैदिकवाङ्मये संस्कृतसाहित्ये च शोध-प्रकाशनादिकार्यार्थ भारते विदेशे वा प्रतिष्ठितशैक्षणिकसंस्थाभिः अद्यपर्यन्तं अष्टाशाधिकसम्मानाः पुरस्काराः वा अवाप्ताः, येष्वन्यतमाः सन्ति–भारतीयमिश्रापुरस्कारः (1989, राजस्थानसंस्कृताकादमी), संस्कृतशिक्षकपुरस्कारः (1994, दिल्लीसंस्कृताकादमी), संस्कृतसाहित्यपुरस्कारः (1997, 2000), उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ), अखिलभारतीयसंस्कृतसाहित्यमौलिकरचनापुरस्कारः (2000, दिल्लीसंस्कृताकादमी), संस्कृतसाहित्येवासम्मानः (2006,दिल्लीसंस्कृताकादमी), विश्ववेदसंघसेवासम्मानः (2004, मैरीलैण्डयुनिवर्सिटी, अमेरिका एवं 2006, होस्टनयुनिवर्सिटी अमेरिका), विद्यालंकारोपाधिः (2007, पूर्वाचलसंस्कृतप्रचारपरिषद, कोलकता), विशिष्टपुरस्कारः (2007, उत्तप्रदेशसंस्कृतसंस्थानम्, लखनऊ), महर्षिव्याससम्मानः (2014, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ), संस्कृतश्री पुरस्कारः (2014,अखिल भारतीय संस्कृतसाहित्यसम्मेलनम,), राष्ट्रपतिसम्मानप्रमाणपत्रम् (2015),

डॉ0 तिवारीमहोदयायाः संस्कृतहिन्द्याङ्ग्लभाषासु अधुना शताधिकाः शोधलेखाः सम्पादितपुस्तकेषु, राष्ट्रियशोधपत्रिकासु, संगोष्ठिप्रकाशनेषु च प्रकाशितः वर्तन्ते। अनया दिल्लीनगरे आकाशवाणीतः नैकाः भारतीयसंस्कृतिसम्बद्धाः वार्ताः प्रसारिताः गतत्रिंशत्वर्षेषु। एतदतिरिच्य महोदययानया भगवतिसरस्वत्याः सततसाधनया उच्चस्तरीयानां अष्टविंशतिग्रन्थानां लेखनं प्रकाशनं कृत्वा विश्वविद्यालयीये संस्कृतजगति निजवैशिष्ट्यं स्थापितम्। प्रकाशितरचनासु अन्यतमाः सन्ति-ऋग्वेदीय अप्रीसूक्त (1981), मुण्डकोपनिषद् (1981), ईशावास्योपनिषद् (1986), सूर्यदेवता–वैदिक और वेदोत्तर संस्कृत सूर्यस्तुतियों में (1994), संस्कृत लोकोक्ति कोष (1996), उपनिषद् खण्ड, दिल्ली संस्कृत अकादमी (1998), संस्कृत साहित्य का इतिहास (1999), ऋग्वैदिक अध्ययन(1999), वैदिक वाङ्मयः एक झलक, (आङ्ग्लभाषातः अनूदितः) (2002), वैदिक अध्ययन (वैदिक स्टडीज) 2004), वैदिकऋषि दीर्घतमा, (सं.) (2005), केनोपनिषद् (2006), हड़प्पा सभ्यता और वैदिक संस्कृति (सं.) (2010), भारतीय परम्परा में सृष्टि एवं स्थिति (सं.) (2011), संस्कृत साहित्य में राष्ट्रवाद और भारतीय राजशास्त्र(2013), वेदव्याख्यापद्धतयः (संस्कृतभाषायाम्, 2014), संस्कृतसाहित्यानुशीलनम् (संस्कृतभाषायाम्, 2015),।

आवासीयसङ्केतः
54, साक्षर अपार्टमेन्टस्,
ए-3 पश्चिम विहार, नयी दिल्ली-110063
दूरभाषः 25265237, 09810690322

## अखिलभारतीयभवभूतिसमारोहस्य आयोजनम्

ग्वालियरः । महाकविभवभूतिशोध एवं शिक्षा समित्या जीवाजीविश्वविद्यालयस्य कालिदाससंस्कृताकादम्याश्च



संयुक्ततत्वाबधाने फरवरीमासे अखिलभारतीयभवभतिसमारोहस्य प्रतिष्ठापूर्णमायोजनमभवत् । अस्मिन् द्विदिवसीये कार्यक्रमे



विभिन्नविद्वांसः शोधपत्रवाचनम्, कविभिश्च कवितापाठः प्रस्तुतः । ग्वालियरनगरनिगमेन च विद्वत्सम्मानस्य आयोजनं कृतम् । अस्य कार्यक्रमस्याध्यक्षता प्रख्यातसंस्कृतविद्वद्भिः पद्मश्रीविभूषिताचार्यैः प्रो.रमाकान्तशुक्लमहोदयैः कृता । अस्मिन् अवसरे डॉ.चन्द्रभूषणझामहोदयः, श्रीकृष्णगुप्तामहोदयः, श्रीरामेश्वरदत्तमहोदयः, श्रीबाबूलालमीना आदयः विशिष्टातिथयः उपस्थिताः आसन् ।



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- संदीप कुमार उपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsa mvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।